# Shivavishnukritam Surya Stotram 16

# शिवविष्णूकृतं सूर्यस्तोत्रम् १६

## Document Information

Text title : Shivavishnukritam Surya Stotram 16

File name : shivaviShNukRRitaMsUryastotram16.itx

Category : navagraha, bhaviShyapurANa, stotra

Location : doc_z_misc_navagraha

Proofread by : PSA Easwaran

Description/comments : bhaviShyapurANa | brAhmaparva | adhyAya 153/50-80||

Latest update : October 7, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 19, 2024

*sanskritdocuments.org*

# शिवविष्णूकृतं सूर्यस्तोत्रम् १६

महादेव उवाच ।
जय भाव जयाजेय जय हंस दिवाकर ।
जय शम्भो महाबाहो खग गोचर भूधर ॥ ६०॥

जय लोकप्रदीपेन जय भानो जगत्पते ।
जय काल जयानन्त संवत्सर शुभानन ॥ ६१॥

जय देवादितेः पुत्र कश्यपानन्दवर्धन ।
तमोघ्न जय सप्तेश जय सप्ताश्ववाहन ॥ ६२॥

महेश जय कान्तीश जय कालेश शङ्कर ।
अर्थकामेश धर्मेश जय मोक्षेश शर्मद ॥ ६३॥

जय वेदाङ्गरूपाय ग्रहरूपाय वै नमः ।
सत्याय सत्यरूपाय सुरूपाय शुभाय च ॥ ६४॥

क्रोधलोभविनाशाय कामनाशाय वै जय ।
कल्माषपक्षिरूपाय यतिरूपाय शम्भवे ॥ ६५॥

विश्वाय विश्वरूपाय विश्वकर्माय वै जय ।
जयोङ्कार वषड्कार स्वाहाकार स्वधामय ॥ ६६॥

जयाश्वमेधरूपाय चाग्निरूपार्यमाय च ।
संसारार्णवपीताय मोक्षद्वारप्रदाय च ॥ ६७॥

संसारार्णवमग्नस्य मम देव जगत्पते ।
हस्तावलम्बनो देव भव त्वं गोपतेऽद्भुत ॥ ६८॥

ईशोऽप्येवमहीनाङ्गं स्तुत्वा भानुं प्रयत्नतः ।
विरराम महाराज प्रणम्य शिरसा रविम् ॥ ६९॥

अथ विष्णुर्महातेजाः कृताञ्जलिपुटो रविम् ।

उवाच राजशार्दूल भक्त्या श्रद्धासमन्वितः ॥ ७० ॥

विष्णुरुवाच ।
नमामि देवदेवेशं भूतभावनमव्ययम् ।
दिवाकरं रविं भानुं मार्तण्डं भास्करं भगम् ॥ ७१ ॥

इन्द्रं विष्णुं हरिं हंसमर्कं लोकगुरुं विभुम् ।
त्रिनेत्रं त्र्यक्षरं त्र्यङ्गं त्रिमूर्तिं त्रिगतिं शुभम् ॥ ७२ ॥

षण्मुखाय नमो नित्यं त्रिनेत्राय नमो नमः ।
चतुर्विंशतिपादाय नमो द्वादशपाणये ॥ ७३ ॥

नमस्ते भूतपतये लोकानां पतये नमः ।
देवानां पतये नित्यं वर्णानां पतये नमः ॥ ७४ ॥

त्वं ब्रह्मा त्वं जगन्नाथो रुद्रस्त्वं च प्रजापतिः ।
त्वं सोमस्त्वं तथाऽऽदित्यस्त्वमोङ्कारक एव हि ॥ ७५ ॥

बृहस्पतिर्बुधस्त्वं हि त्वं शुक्रस्त्वं विभावसुः ।
यमस्त्वं वरुणस्त्वं हि नमस्ते कश्यपात्मज ॥ ७६ ॥

त्वया ततमिदं सर्वं जगत्स्थावरजङ्गमम् ।
त्वत्त एव समुत्पन्नं सदेवासुरमानुषम् ॥ ७७ ॥

ब्रह्मा चाहं च रुद्रश्च समुत्पन्ना जगत्पते ।
कल्पादौ तु पुरा देव स्थितये जगतोऽनघ ॥ ७८ ॥

नमस्ते वेदरूपाय अहोरूपाय वै नमः ।
नमस्ते ज्ञानरूपाय यज्ञाय च नमो नमः ॥ ७९ ॥

प्रसीदास्मासु देवेश भूतेश किरणोज्ज्वल ।
संसारार्णवमग्नानां प्रसादं कुरु गोपते ॥ ८० ॥

वेदान्ताय नमो नित्यं नमो यज्ञकलाय च ।

इति भविष्यपुराणे ब्राह्मे पर्वणि त्रयःपञ्चाशदधिकशततमाध्यायान्तर्गतं
शिव-विष्णुकृतं सूर्यस्तोत्रं समाप्तम् ।

भविष्यपुराण । ब्राह्मपर्व । अध्याय १५३/५०-८० ॥

bhaviShyapurANa . brAhmaparva . adhyAya 153/50-80..

Proofread by PSA Easwaran

*Shivavishnukritam Surya Stotram 16*

pdf was typeset on October 19, 2024

Please send corrections to *sanskrit@cheerful.com*